॥ आरुणिकोपनिषत् ॥ 16
आरुणिकाख्योपनिषत्ख्यातसंन्यासिनोऽमलाः ।
यत्प्रबोधाद्यान्ति मुक्तिं तद्रामब्रह्म मे गतिः ॥
ॐ आप्यायन्त्विति शान्तिः ॥
ॐ आरुणिः प्राजापत्यः प्रजापतेर्लोकं जगाम । तं
गत्वोवाच । केन भगवन्कर्माण्यशेषतो विसृजामीति ।
तं होवाच प्रजापतिस्तव
पुत्रान्भ्रातॄन्बन्ध्वादीञ्छिखां यज्ञोपवीतं यागं
स्वाध्यायं
भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकं
चातलतलातलवितलसुतलरसातलमहातलपातालं ब्रह्माण्डं
च विसृजेत् । दण्डमाच्छादनं चैव कौपीनं च
परिग्रहेत् । शेषं विसृजेदिति ॥ १॥
गृहस्थो ब्रह्मचारी वा वानप्रस्थो वा उपवीतं भूमावप्सु
वा विसृजेत् । लौकिकाग्नीनुदराग्नौ समारोपयेत् ।
गायत्रीं च स्ववाचाग्नौ समारोपयेत् । कुटीचरो
ब्रह्मचारी कुटुंबं विसृजेत् । पात्रं विसृजेत् ।
पवित्रं विसृजेत् । दण्डाँलोकांश्च विसृजेदिति होवाच
। अत उर्ध्वममन्त्रवदाचरेत् । ऊर्ध्वगमनं विसृजेत् ।
औषधवदशनमाचरेत् । त्रिसन्ध्यादौ स्नानमाचरेत् ।
सन्धिं समाधावात्मन्याचरेत् । सर्वेषु
वेदेष्वारण्यकमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तय्
एदिति ॥ २॥
खल्वहं ब्रह्मसूचनात्सूत्रं ब्रह्मसूत्रमहमेव
विद्वान्त्रिवृत्सूत्रं त्यजेद्विद्वान्य एवं वेद संन्यस्तं मया
संन्यस्तं मया संन्यस्तं मयेति त्रिरुक्त्वाभयं
सर्वभूतेभ्यो मत्तः सर्वं प्रवर्तते । सखामागोपायोजः
सखायोऽसीन्द्रस्य वज्रोऽसि वार्त्रघ्नः शर्म मे भव
यत्पापं तन्निवारयेति । अनेन मन्त्रेण कृतं वाइणवं
दण्डं कौपीनं
परिग्रहेदौषधवदशनमाचरेदौषधवदशनं
प्राश्नीयाद्यथालाभमश्नीयात् । ब्रह्मचर्यमहिंसा

चापरिग्रहं च सत्यं च यत्नेन हे रक्षत हे रक्षत हे रक्षत इति ॥ ३॥
अथातः परमहंसपरिव्राजकानामासनशयनादिकं भूमौ ब्रह्मचर्यं मृत्पात्रमलाम्बुपात्रं दारुपात्रं वा यतीनां कामक्रोधहर्षरोषलोभमोहदम्भदर्पेच्छासूयाममत्वाहङ्कारादीनपि परित्यजेत् । वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी यतिश्चरेत् द्वावेव वा विचरेद्द्वावेव वा विचरेदिति ॥ ३॥
स खल्वेवं यो विद्वान्सोपनयनादूर्ध्वमेतानि प्राग्वा त्यजेत् । पित्रं पुत्रमग्न्युपवीतं कर्म कलत्रं चान्यदपीह यतयो भिक्षार्थं ग्रामं प्रविशन्ति पाणिपात्रमुदरपात्रं वा । ॐ हि ॐ हि ॐ हीत्येतदुपनिषदं विन्यसेत् ॥ खल्वेतदुपनिषदं विद्वान्य एवं वेद पालाशं बैल्वमाश्वत्थमौदुम्बरं दण्डं मौञ्जीं मेखलां यज्ञोपवीतं च त्यक्त्वा शूरो य एवं वेद । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदमिति । एवं निर्वाणानुशासनं वेदानुशासनं वेदानुशासनमिति ॥ ५॥
ॐ आप्यायन्त्विति शान्तिः ॥
इति सामवेदीयारुणिकोपनिषत्समाप्ता ॥

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org